International Journal of Sanskrit Research 2015; 1(5): 22-24

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(5): 22-24
© 2015 IJSR
www.sanskritjournal.com
Received: 17-06-2015
Accepted: 20-07-2015

**Biswajit Ghosh**
Research Scholar of Burdwan University (W.B.)

**Nikhil Kumar Ghosh**
Vill. + P.O.- Anur, Dist.- Hooghly, P.S.-Goghat,Sub- Arambagh-722161 (W.B.)

**Correspondence**
**Biswajit Ghosh**
Research Scholar of Burdwan University (W.B.)

# अद्वैतवेदान्ते अद्वैत-शब्दस्य गूढार्थसमीक्षा

**Biswajit Ghosh, Nikhil Kumar Ghosh**

भारतवर्षस्य आध्यात्मिकी चिन्तामवलम्ब्य प्रतीच्ये वर्तमाने यल्लिखितम् अध्यापितं वा, तत् प्रधानतः एक एव मतवादः- अद्वैतवादः'। भारतीयधर्मस्य समग्रं तत्त्वं तस्य दार्शनिकमतवादे निहितः। अधुना अद्वैत-शब्दस्य अन्तर्निहितार्थः विशेषेण ज्ञातव्यः।
द्वयोर्भावः द्विता (द्वि शब्देन सह भावार्थे तल् प्रत्यय योगेन) द्वितैव द्वैतम् (द्वि'-शब्देन सह स्वार्थे अन् प्रत्यययोगेन), न द्वैतम् अद्वैतम् (नञ् ततपुरुषः समासः)। जगत् ब्रह्म च शब्दद्वयोर्मध्यो यः व्यवहारिको भेदः अनुभूयते तद् द्वैतम्'। भेदरूपद्वैतस्य निषेध एव अद्वैतम्'। अत्र अद्वैतशब्दे भेदसामान्यस्य निषेध एव प्रतिपन्नः। अपि च अत्र तादात्म्य सम्बन्धावच्छिन्नायाः प्रतियोगितायाः अभाव एव भेदः। अयं भेदः त्रिविधः सजातीयः विजातीयः स्वगतश्च। सर्वधर्मविशिष्टस्य वस्तुसमूहस्य मध्ये यः पारस्परिकः भेदः सः वस्तुनः सजातीयो भेदः। यथा, वृक्षात् वृक्षान्तरस्य भेदः। विलक्षण- धर्मयुक्तस्य वस्तुनिचयस्य मध्ये यो भेदः सः वस्तुनः विजातीयः भेदः। यथा, वृक्षात् शिला प्रभृतीनां भेदः। अपि च एकस्यैव वस्तुनः अङ्ग-प्रत्यङ्गानां मध्ये यो भेदः सः वस्तुनः स्वगतो भेदः। यथा, एकस्यैव वृक्षस्य शाखा-प्रशाखादिगतो भेदः। तुलनीयः ---

> वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।
> वृक्षान्तरात् सजातीयो विजातीयः शिलादितः।। १

श्रुत्युक्ते एकस्मिन् अद्वितीये विशुद्धे (निर्गुणे) ब्रह्मणि अयं त्रिविधो भेदः न तिष्ठति, तत् शङ्करः विदयारण्यःच मनीषिगणः स्व स्व ग्रन्थे सुष्ठु प्रदर्शयति।
केचिए दार्शनिक सम्प्रदायाः जीव-ब्रह्मणोः व्यवहारिकं भेदं स्वीकुर्वन्ति। आचार्यस्य शङ्करस्य सिद्धान्तः जीव-ब्रहणोः भेद अतात्त्विकः। आचार्यः शङ्करः कुत्रापि अवच्छेदवादं कुत्रापि च प्रतिविम्बवादम् आश्रित्य जीव ब्रह्मणोः व्यवहारिकं भेदं विशदीकरोति। मृषा अस्य भेदस्य व्याख्या या एव भवतु, तत्त्वं तु एकमेव सत्यं बदति- य एव जीवः सः एव शिवः। यश्च प्रज्ञाघनः स्वात्मज्येतिः, सः एव शिवः ब्रह्म वा।

> आत्मर्ज्येतिः प्रत्यग्ज्योतिः परात्परः।
> ज्योतिर्ज्योतिः स्वयंज्योतिरात्मज्योतिः शिबोहस्म्यहम्।।२

आचार्यः शङ्करः आत्ममतं प्रतिष्ठाप्य बदति यत्, कोऽपि भेदः न स्यात्, अर्थात् स्वगतः सजातीयः विजातीयश्च कोऽपि ब्रह्मणः भेदः न सम्भवः। यतः ब्रह्म एकम् अर्थात् निराकारम् अखण्डं च ततः तस्य स्वगतो भेदो न सम्भवः। अपि च सजातीयः भेदोहपि न स्यात् कुतः ब्रह्म द्विविधं वहुविधश्च न, ब्रह्म एकम्। पुनः अस्य विजातीयो भेदोहपि न स्यात्। कुतः ब्रह्म अद्वितीयम् अर्थात् सार्वात्म्यवशतः ब्रह्म ऋते किमपि वस्तु स्वरूपतः न सिध्यति। ततः आचार्यः शङ्करः बदति----

> "स्वकार्य पतितमन्यन्नास्तीत्येकमेवेत्युच्यते।
> .....नास्य द्वितीयं वस्त्वन्तरं विदयत इत्यद्वितीयमिति।।"३

ब्रह्म एकमेव उच्यते, कुतः स्वकार्यभावापन्नस्य ब्रह्मणः अतिरिक्तम् अपरं किमपि नास्ति। ब्रह्म 'अद्वितीयम्'। कुतः प्रपञ्चरूपस्य कायोत्पत्तौ सदब्रह्मणः पृथक् द्वितीयं किमपि वस्तु 'सत्' इति पदार्थस्य सहकारिरूपेण अपेक्षितं न भवति। ब्रह्म अद्वितीयम्, ततस्तद् विजातीयं भेदशून्यम्---

> "एकमिति.....सजातीय स्वगतभेदहीनमित्यर्थः।
> अद्वितीयमितीति विजातीयभेदशून्यमित्यर्थः।।"

महामतिः आनन्दगिरिः व्याख्यया एवं बदति।

'एकमेवाद्वितीयम्' - इति वाक्ये ऐक्यवादिना अखण्डत्ववादिना वा एकम् इति पदेन ब्रह्मणि केवलं स्वगतभेद एव निषिध्यते, न तु सजातीयभेदः। ब्रह्मणि सजातीयः भेदः निषिध्यते श्रुतिवाक्यस्य 'एव'-इति पेदन। एवमपि बोध्यते 'एव' पदेन यत् ब्रह्म न द्विविधं बहुविधम् वा। पुनः विजातीय भेद निषिध्यते द्वैतप्रतिषेधवाचिना 'अद्वितीयम्' इति पदेन। ततः विदयरण्यो मुनिः पञ्चदशी इति ग्रन्थे वदति-

"यथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते।
ऐक्यवधारणद्वैत प्रतिषेधैस्त्रिभिः क्रमात्।४"

अपि च मधुसूदनः सरस्वती इति महोदयस्य मतेन, "अस्य गैर्द्वितीयोऽन्वेष्टव्यः इत्युक्ते गौरवे द्वितीयोऽन्विष्यते, नाश्वो न गर्दभः।"५ महाभाष्यकारस्य मतानुसोरण, 'द्वितीय' इति शब्देन यदि 'एकजातीयः अन्यत्वरूपः' इति अर्थः बाध्यते, तर्हि अद्वितीय इति शब्देन ब्रह्मणः सजातीयः भेदः इत्यर्थस्य प्रतीतिः स्यात्। विजातीयस्वगतयोः भेदरूपः अर्थः स्वेच्छया एकावधारणबोधकेन पदेन बोद्धव्यः। अद्वैतमिति पदस्यार्थः न सम्पूर्ण भेदराहित्यं केवलमांशिकं भेदराहित्यं स्यादित्याशङ्का ऐक्यासाधारणाभ्यां पदाभ्यां विजातीयभेदश्च अद्वितीयमिति पदेन सिध्यति। तुलनीयः - "यदि च तस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गोरवे द्वितीयोऽन्विष्यते, नाश्वो न गर्दभः इति महाभाष्यानुसारात् समानजातीयद्वितीयपरत्वं द्वितीयशब्दस्य तदा अद्वितीयशब्दस्य सजातीयभेदनिषेधपरत्वम्, विजातीय- स्वगतभेदनिषेधपरत्वं तु एकावधारणपदयोर्यथेष्टं व्याख्योयम् अथवा अद्वितीयपदेनैव भेदत्रयनिषेधः एकावधारणपदे तु सङ्कैाचशङ्कापरिहाराय।"६

ब्रह्माद्वैतवादिनः आचार्य शङ्करस्य मतानुसारेण अद्वैतशब्दस्य भेदत्रयनिषेधरूपो मुख्यार्थ एव गृहीतः- अयमेवात्र प्रधानः अवधारणीयो विषयः किन्तु अपरेषां दार्शनिक-सम्प्रदायानां मतेन अद्वैतशब्दस्य अर्थसंङ्कोचनेन गौणार्थं स्वीक्रियते। यथा विशिष्टाद्वैतवादिनः श्रीरामानुजाचार्यस्य मतेन ब्रह्म सगुणं सविशेषञ्च अनन्तकल्याणगुणानामाकरः सर्वज्ञत्व-सर्वशक्तिमत्वादि-गुणयुक्तं स्वभावतः च सर्वविधैः प्राकृतैः हेयगुणैः रहितम् अनन्तजगतः च सृष्टि-स्थिति-लयानां कारणम्, निमित्तकारणमुपादानकारणमुभ एव। (द्रष्टव्यः ब्रह्मसूत्रः श्रीभाष्यः सूः-१/१/१)। अनेन मतानुसारेण भगवत्-सजातीयं भगवद्विजातीयं च किमपि वस्तु यतः न स्यात्, यदयपि न स्यात्, तथापि साकारस्य सगुणस्य च भेदराहित्यरूपेण अद्वैतमिति पदम् मुख्यभावेन न प्रयुक्तं लाक्षणिकभावेनैव प्रयुक्तं स्यात्, कुतः बहुषु पुरुषेषु स्वगतः सजातीयः भेदः यदयपि सम्भवः तथापि विजातीयः भेदः न सिध्यति। सांख्यसूत्रस्य प्रणेता महर्षिः कपिलः वदति- नाद्वैतश्रुतिविरोधो जातिपरत्वात्।७" सांख्योक्तेण नानापुरुषवादेन सह अद्वैतश्रुते विरोधः न भवति। कुतः अद्वैतार्थ- प्रतिपादिका श्रुतिः, तत्र जाति-तात्पर्येण एवम् उपदिष्टम्-सर्व आत्मैव समानः - एकरूपः - अनेन अभिप्रायेणैव श्रुतौ 'एक' शब्दस्य प्रयोगः भवति, न तु अखण्ड इत्यभिप्रायेण। अतः पुरुषस्य विजातीयः भेदः एव श्रुतिवाक्यस्य एकाद्वितीय शब्देन। विज्ञानभिक्षुपादः अनेन कारणेनैव सांख्य प्रवचनभाषो स्पष्टतः एव वदति- "इत्यादयद्वैतश्रुत्यपपदकतयैव सूत्रं व्याख्ययम् जातिपरत्वात्। विजातीय द्वैतनिषेधपरत्वादित्यर्थः।" "जातिः सामान्यमेकरूपत्वं तत्रैवाद्वैतश्रुतीनां तात्पर्यात् न त्वखण्डत्वे प्रयोजनाभावात्"८ अर्थात् सृष्टेः प्राक् इदं जगत् एकात्मैव आसीत्। इदं जगत् एकं जगत् एकमद्वितीयं सत्स्वरूपमेव असीत् इत्यादयः श्रुतेः उपपादकरूपेण अविरोधेन सूत्रं व्याखोयम्। एकमद्वितीयमिति पदस्य जातिरूपार्थः श्रुतौ गृहीतः। अर्थात् अत्र विवक्षितः विजतीयाद्वैतनिषेधरूपार्थ एव। सामान्यस्य व्यक्तिसमूहस्य वा एकरूपतैव जातिसमूहस्य अर्थः, अनेन अर्थेनैव अद्वैतश्रुतिवाक्यस्य तात्पर्यं किन्तु केनापि प्रयोजनाभोवन अखण्डरूपार्थे तात्पर्यं न स्यात्। प्रवोचनभाष्यस्य प्रारम्भे मङ्गलचारणे श्लोकेहपि भिक्षुपादः वदति---

"एकोऽद्वितीय इति वेदवचांसि पुंसि
सर्वाभिधानविनिवर्त्तनतोऽसो मक्त्यै।
वैधर्मलक्षणभिदा विरहं वदन्ति
न खण्डतां ख इव धर्मशतविरोधात्।।९ "

पुनः विज्ञानाद्वैतवादि-योगाचार-वौद्धगणस्य मतेन-विज्ञानं विलक्षणवस्तुसिद्धं न स्यात्, तस्य ततः स्वागतभेदोहपि न भवति। किन्तु यतः सलक्षणं (सजातीयं) वहु-विज्ञानं सम्भावितं स्यात् विज्ञानस्य सजातीयं भेदमात्रमपि न सिध्यति। ततः अनेन मतेनैव विजातीयस्वगतयोर्भेदराहित्यरूपेण अर्थेनैव अद्वौतशब्दस्य गौणः प्रयोगः भवति। किन्तु सर्वाधिक-भेदनिषेधरूपेण मूख्यार्थेण एव अद्वैतशब्दस्य व्यवहारो न भवति।

अस्मिन् क्षेत्रे शङ्कराचार्यस्य मतमेव सर्वाधिकमुपादेयम् कुतः केवलं शङ्कर एव 'एकमेवाद्वितीयम्' इत्यादौ वाक्ये त्रिविध-भेदराहित्यरूपं मुखार्थमेव गृहीत्वा श्रुतेः सिद्धान्तं प्रतिपादितं करोति। तत एव वेदवाक्ये यथासम्भवम् अभिधेयार्थमेव गृह्यते, लाक्षणिकार्थम् न। अपि च अद्वैतशब्दस्य सर्वभेदनिषेधरूपार्थः केवलं न श्रुतिसिद्धः, युक्तिसिद्धेऽपि। कुतः प्रतियोगितायाः छेदकविशिष्टः सर्वैः प्रतियोगिभि सार्धमेव सदा निषेधार्थक-नञ्-इत्यस्य अन्वयो भवति, किन्तु केनाचिदपि धर्मावच्छिन्नेन प्रतियोगिना सह तस्य अन्वयो न भवति। (अस्मिन् अवच्छेदवादे अविदया अन्तःकरणमेव उपाधिः। महाकाशो यथा घटावछिन्नः सन् घटाकाशसंज्ञां लभते, तथा शुद्धचैतन्यस्वरूपं ब्रह्मापि अविदयावछिन्नं अन्तःकरणमेव उपाधिः। महाकाशो यथा घटावछिन्नः सन् घटाकाशसंज्ञां लभते, तथा शुद्धचैतन्य ब्रह्मापि अविदयावच्छिन्नं अन्तःकरणावच्छिन्नं वा सत् 'जीवः' इति संज्ञां लभते। घटनाशे सति यथा घटाकाशः महाकाशे विलीनो भवति, तथा अविदयानाशेन अन्तः करणरूपमुपोपाधि नाशेन जीवस्योहपि लयो भवति, अर्थात् जीवस्य जीवत्वं ध्वंसप्राप्तं भवति। मतमिदम् अवच्छेदवादः उपाधिवोदो वा उच्यते।) यथा- 'घटो न'- इति वाक्ये घटत्वावच्छिन्न प्रतियोगितायां निषेधः `बोद्धव्यः। किन्तु किञ्चित् धर्मावच्छिन्नः न बोद्धव्यः। ततः अद्वैतशब्देन द्वैतत्तावच्छिन्नप्रतियोगितायाः निषेधः न बोद्धव्यः। अस्मिन् विषये नैयायिकः-शिरोमणेः जगदीशस्य उक्तिरेव प्रामाण्या।

"तद्धर्मविशिष्टवोधकपदसमभिव्याहृतेन्यादिपदेनोपस्थापितेऽन्यत्वादौ
तद्धर्मावच्छिन्नप्रतियेगिताकत्वप्रकारेनैव तादयात्म्येनाम्वयः,
न तु तद्धर्माश्रयप्रतियोगिताकत्वेन।"१०

रामानुजः, मध्वः, वल्लभश्च इत्यादयः दार्शनिकाः तेषां विशिष्टाद्वैतः, द्वैतः, द्वैताद्वैतश्चेति ग्रन्थेषु सगुण-ब्रह्मापि शास्त्रस्य चरमतत्त्वं मत्वा अद्वैतशब्दस्य लाक्षणिकार्थमेव गृह्णन्ति, तत् तु श्रुति विरुद्धम्, ततः शास्त्रस्य चरमं परमं सिद्धान्तं न स्यात्। इदं परमं चरमं च सिद्धान्तं शङ्कराचार्यः अद्वैतवादे वदति। श्रुत्युक्तेन अद्वैतशब्देन सर्वभेदशूण्यं, निराकारं, निर्गुणं निर्विशेषं ब्रह्मतत्त्वमेव उपलक्षितं स्यात्। इदं निःसन्देहमुच्यते यत् शङ्करस्य अद्वैतवाद एव केवलं श्रुति-समर्थितं भवेत्।

ब्रह्मसूत्रस्य भाष्ये भामत्यं च उक्तम्- "ब्रह्मशब्दस्य हि ब्युत्पादयमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थ-नुगमत्।" "बृद्धिकर्मा हि बृहतिरतिशायने बर्तते। तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगतिं नित्यशुद्धबुद्धत्वादयास्याभ्यनुजानीतीत्यर्थः।" ११ अर्थात् अतिशायनार्थे प्रसिद्धः 'बृहति' इति धातुना सह मनिन् -इति प्रत्यययोगेन निष्पन्नं ब्रह्म इति शब्दस्य अर्थः सर्वव्यापित्वं नित्यनिरतिशयत्वं वा सातिशयं वस्तुमात्रमपि अनित्यम् अशुद्धं च। किन्तु ब्रह्म यतः निरतिशयं ततः ब्रह्म नित्यं शुद्धं च। अत्र नित्यनिरतिशयत्वमेव ब्रह्मणः परिच्छिन्नत्वस्य ज्ञापकम्, अपि च अपरिच्छिन्नत्वमेव ब्रह्मणः नित्य-शुद्धत्वस्य, अखण्डत्वस्य, निर्गुणत्वस्य च प्रयोजकम्। ब्रह्मणः कोऽपि अन्तः नास्ति, ततः ब्रह्म अनन्तम्। श्रुतिनिर्देशः - "सत्यं ज्ञानमनन्तं ब्रह्म।"१२ ब्रह्मणः कोऽपि दैशिक परिच्छेदो नास्ति, यतः ब्रह्म सर्वव्यापी, ब्रह्मणः कोऽपि कालिक-परिच्छेदोहपि नास्ति। यतः ब्रह्म नित्यम् अनुरूपभावेन ब्रह्मणः कोऽपि बास्तविक् परिच्छेदोऽपि नास्ति, यतः ब्रह्म सार्वात्मकम्। एवं दृश्यते यत् परिच्छिन्नं (साकारम्) वस्तु एव यत् किञ्चित् भेदाविशिष्टं भवति, ततः अनित्यम् अविशुद्धं च भवेत्। ब्रह्म तु यतः अपरिच्छिन्नं ततः ब्रह्म किमपि न भेदयुक्तम्, किमपि अशुद्धम् अनित्यं च न स्यात्। किं बहुना व्यवहारिके अनित्ये अशुद्धे बस्तुनि एव देशतः कालतः वस्तुतश्च-एवं त्रिविधं परिच्छेदं दृश्यते। ब्रह्मणि देशकालादि-परिच्छेदस्य योगः, न सम्भवेत् एवं स्वयं

शङ्करोऽपि श्रुतिं स्मृतिं युक्तिञ्च प्रमाणरूपेण स्वीकृत्य बदति-" निष्फलं शान्तं निरवदयं निरञ्जनम।"१३ "अस्थूलमह्रस्वमदीर्यम् "१४ "स वाहयाभ्यन्तरो हयजः" १५ "स बा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म।"१६ "स एष नेति नेत्यात्मा"१७ " इत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनि कल्पयितुं शक्यते"१८ विदयारण्यमुनिः अपि स्वीय-ग्रन्थे ब्रह्मणः उक्तं द्रिविधं आनन्त्यं सुष्ठु दृष्टायितं करोति----

"न व्यापित्वाद्देशतोऽन्तः नित्यत्वान्नापि कालतः।
न वस्तुतोऽपि सार्वत्म्यात् आनन्त्यं ब्रह्मणि त्रिधा"।।१९

ऋषत्वः अपि, "यत्र त्वस्य सर्वमात्मौवाभूत् तत् केन कं पश्येत्।" २० "यत्र नान्यत् पश्यति, नान्यच्छृणोति नान्यद्विजानाति स भूमा......यो वै भूमा तदमृतम्"२१ - इत्यादिभि : बाक्यैः ज्ञातिज्ञेयादिशूण्यम् अखण्डम् अद्बितीयं भूमानन्दस्वरूपं निर्गुणं ब्रह्मतत्त्वमपि श्रुति युक्तिसिद्धस्य अद्वैतशब्दस्य मुख्यार्थरूपेण निर्धारयति। किं बहुना प्रेक्षावन्तः जनाः सदा समादरं करिष्यन्ति एवं श्रुत्या, स्मृत्या, न्यायेन, अनुभवेन प्रसाधितम् ईदृशस्य अद्वैतशब्दस्य अर्थम्। अनिच्छुः अपि इदं कदापि कोऽपि उपेक्षते। यदयपि अनेके ब्रह्म सगुणं सविशेषं च बदति, तथापि अस्मिन् ग्रन्थे निर्गुणं ब्रह्म एव प्रतिपादितम्। केनोपनिषदि उक्तं यत्, सगुणः ब्रह्मापि निर्गुणे ब्रह्मणिः एकीभूतं भवति। यथा-तुषारः बारिणः उत्पदयते, असौ तु बारिणः पृथग्रूपेण दृश्यते। सूर्ये उदिते अर्णवस्य उपरि भासमाना तुषार-खण्डः तरलीभूय समुद्रे मिलिता भवन्ति। एवमेव ज्ञानरूपे सूर्ये उदिते सगुणं साकारं वा ब्रह्मापि क्वचित् तस्य मायया रूपं गृह्णाति, तत् तु क्षणिकं अस्थायि अनित्यं बा। अतः सिद्धान्तमिदम्- अनन्तस्वरूपे, अनन्त चित्स्वरूपे, अनन्तानन्दस्वरूपे च ब्रह्मणि कोहपि भेदः सम्भवः, तस्मात् निर्गुणं, निराकारं, विशुद्धश्च ब्रह्मैव यत् अद्वैतशब्दस्य प्रकृत्यार्थः तत् वयं गौरवेण उदात्तकन्ठेन घोषयामः।

**तथ्यसूत्राणि**

१. पञ्चदशी, २/२०
२. बेदान्तसारः, पृः ३१३
३. छान्दोग्योपणिषद्- ६ / २/१ भाष्यम्।
४. पञ्चदशी, २ /२१
५. महाभाष्यं पस्पशाह्निकम्।
६. अद्वैतसिद्धिः प्रथमः परिच्छेदः।
७. सांख्यदर्शनम् , १/१५४
८. सांख्यप्रवचनभाष्यम्, १/११५
९. प्रवचनभाष्यस्य प्रथमः श्लोकः।
१०. व्याप्तिपञ्चकम्-जगदीशी पञ्चमलक्षणम्
११. ब्रह्मसूत्रम् १/१/१ शङ्करभाष्यम्
१२. भामती, १/१/१
१३. तैत्तिरीयोपनिषद्, २ /१/१
१४. श्वेताश्वतरोपनिषद् ६/१९
१५. बृहदारण्यकोपनिषद्, ३/८/८
१६. मुण्डकोपनिषद, २ /१/१
१७. बृहदारण्यकोपनिषद्, ४/४/२४
१८. तदेब, ३/९/२६
१९. पञ्चदशी, ३/३५
२०. बृहदारण्यकोपनिषद्, ४/५/९५
२१. छान्दोग्योपनिषद, ७/२४/१

**ग्रन्थपञ्जी**


१. वेदान्तदर्शनम् (शङ्करभाष्यम् बेदव्यासः भामती च टीका), निर्णयसागरः प्रेस, बोम्बाइ, १९३८।
२. वेदान्तदर्शनस्य इतिहासः, स्वामी प्रज्ञानानन्दः सरस्वती, स्वामी प्रज्ञानन्दः ट्रास्ट् कोलकाता, १३७३ वङ्गाब्दः।
३. वेदान्तसारः, श्रीसदानन्दः योगीन्द्रः सरस्वती प्रणीतः, अनुबादः टीका च स्वामी अमृतत्त्वानन्दः, उद्बोधन- कार्यालयः कोलकाता, १९९८, अष्टमं पुनर्मुद्रणम् २००४
४. उपनिषद्-ग्रन्थावली, स्वामी गम्भीरानन्दः, उद्बोधन-कार्य्यालयः, कोलकाता, १९६२।
५. पञ्चदशी, बिदयारण्यस्वामी, स्वामी सत्यव्रतानन्दः, आनुवादकः,स्वामी वाणेशानन्दः, उद्बोधन-कार्य्यालयः, कोलकाता, बागवाजारः, २००१।
६. सांख्यदर्शनम् (प्रबोचनभाष्येण सह), बिज्ञानभिक्षुः सेन्ट्राल-बुक-एजेन्सी, कोलकाता, १३६० बङ्गाब्दः।
७. ब्याप्तिपञ्चकम्, राजेन्द्रनाथः षोषः, पश्चिमबङ्गः राज्य-पुस्तक-पर्षदः, प्रथमः प्रकाशः, अक्टोबरः, १९८२।
८. ब्रह्मसूत्रम्, स्वामी बीरेशानन्दः, उद्बोधन-कार्य्यालयः, बागवाजारः, कोलकाता, ७००००३, १४०३, १९९६,११-तमः पुनर्मुद्रणम्, फाल्गुनः-१४२०।
९. ब्याकरण-महाभाष्यम्, पण्डितः दधिरामः शर्मा, चौखामासुरभारती प्रकाशना, बाराणसी, १९८८।